लघु । इति राजवल्लभः ॥ (यथा मनुः ३ । २६९ ।
"षड़ावेणस्य मांसेन रौरवेण नवैव तु" ॥
अस्य लक्षणं यथा ॥ "एणः कृष्णः प्रकीर्त्तितः" ।
इति भावप्रकाशस्य पूर्ब्बखण्डे २ भागे ॥)
एणकः, पुं, ( एण + स्वार्थे कन् । )एणः । इति शब्द-
रत्नावली ॥
एणतिलकः,पुं, (एणो मृगस्तिलकमिव यस्य । चन्द्रस्य
मृगाङ्कत्वात्तथात्वम् ।) चन्द्रः । इति हारावली ॥
एणभृत्, पुं, (एणं बिभर्त्तीति । एण + भृ + क्विप् ।)
चन्द्रः । इति हेमचन्द्रः ॥
एतं, त्रि, (आ + इण् + क्त ।) आगतम् । इति मेदिनी ॥
कर्ब्बूरवर्णयुक्तम् । इत्यमरः ॥ (स्त्रियां एनी एता ।
पाणिनिः ४ । १ । ३९ ॥)
एतः, पुं, (आ सम्यक् एति गच्छतीति । आ + इण्
+ क्त ।) मृगः । इति शब्दरत्नावली ॥ कर्ब्बूरवर्णः ।
इति मेदिनी ॥
एतद्, त्रि, (इण् + "एतेस्तुट् च" इति उणादि-
सूत्रेण १ । १३२ । अतोऽदि स्यात्तस्य तुडागमः ।)
पुरोवर्त्तिवाचकसर्व्वनामशब्दः । इति व्याकरणम् ॥
एह इति भाषा ।
("एते वयममी दाराः कन्येयं कुलजीवितम्" ।
इति कुमारे ६ । ६३ ॥ "एतान् महाराज विशेष-
धर्म्मान्" । इति शुद्धितत्त्वम् । उक्तस्य पश्चादुक्तौ
"द्वितीयाटौस्स्वेनः" २ । ४ । ३४ । इति एनादेशः
स्यात् । यथा "य एनमाश्रमधर्म्मे नियुङ्क्ते" ।
इति शाकुन्तले प्रथमाङ्के ॥) [हेमचन्द्रः ॥
एतनः, पुं, (आङ् + इ + तन ।) निश्वासः । इति
एतर्हि, अ, (इदम् + "इदमोर्हिल्" । ५ । ३ । १६ ।
इति र्हिल् ततो "एतेतौ रथोः" ५ । ३ । ४ ।
इति एतादेशः ।) एतस्मिन् काले । सम्प्रति ।
इत्यमरः ॥ (यथा भागवते १ । १७ । ४२ ।
"स एष एतर्ह्यध्यास्त आसनं पार्थिवोचितम्" ॥)
एतशः, पुं, (इण् + "इणस्तशन्तशसुनौ" ३ । १४९ ।
इति उणादिसूत्रेण तशन् ।) ब्राह्मणः । इत्यु-
णादिकोषः ॥
एतशाः, [स्] पुं, (इण् + "इणस्तशन्तशसुनौ"
३ । १४९ इति उणादिसूत्रेण तशसुन् ।) ब्राह्मणः ।
इत्युणादिकोषः ॥
एतावत्,त्रि, (एतद् + "यत्तदेतेभ्यः परिमाणे वतुप्" ।
५ । २ । ३९ । इति परिमाणे वतुप् ।) (एतत्परि-
माणम् । इति व्याकरणम् ॥ (यथा रघुः २ । ५१ ।
"एतावदुक्त्वा विरते मृगेन्द्रे
प्रतिस्वनेनास्य गुहागतेन" ॥)
एध, ङ, वृद्धौ । इति कविकल्पद्रुमः ॥ (भ्वादिं-
आत्मं-अकं-सेट् ।) ङ एधते । इति दुर्गादासः ॥
(यथा मनुः ४ । १७० ।
"हिंसारतश्च यो नित्यं नेहासौ सुखमेधते" ॥)
एधः, पुं, (इध्यतेऽनेनाग्निः । इन्ध + "हलश्च" ३ ।
३ । १२१ । इति करणे घञ् । अवोदैधौद्मप्रश्रथ-
हिमश्रथाः" इति घञि नलोपो गुणश्च निपा-
तितः ॥) इन्धनम् । इत्यमरः ॥ जालानि काठ
इति भाषा । (यथा रघौ ९ । ८१
"एधान् हुताशनवतः स मुनिर्ययाचे" ॥)
एधः, [स्] क्ली, (एध् + असुन् ।) इन्धनम् । इत्य-
मरः ॥ (यथा गीतायाम् । ४ । ३७ ।
"यथैधांसि समिद्धोऽग्निर्भस्मसात् कुरुतेऽर्ज्जुन" ॥)
एधतुः, त्रि, (एध् वृद्धौ "एधिवह्योश्चतुः" १ । ७९ ।
उणादिसूत्रेण चतुः ।) वर्द्धितम् । वृद्धियुक्तम् ।
इति शब्दरत्नावली ॥
एधतुः, पुं, (एध + "एधिवह्योश्चतुः" । १ । ७९ ।
उणादिः चतुः ।) पुरुषः । अग्निः । इति मेदिनी ॥
एधितः, त्रि, (एध वृद्धौ + क्त ।) वर्द्धितः । वृद्धि-
प्राप्तः । इत्यमरः ॥
एनः, [स्] क्ली, (एति गच्छति प्रायश्चित्तेन । इण्
आगसीत्यसुन् नुडागमश्च ।) पापम् । अपराधः ।
इति मेदिनी ॥ निन्दा । इति शब्दरत्नावली ॥
("एनोनिवृत्तेन्द्रियवृत्तिरेनम्
जगाद भूयो जगदेकनाथः ॥
इति रघुः । ५ । २३ ॥)
एरका, स्त्री, तृणविशेषः । तत्पर्य्यायः । गुन्द्रमूला २
शिम्बी ३ गुन्द्रा ४ शरी ५ । यथा भागवते
१ । ३ । १८ ।
"चतुर्द्दशं नारसिंहं बिभ्रद् दैत्येन्द्रमूर्ज्जितम् ।
ददार करजैर्व्वक्षस्येरकां कटकृद् यथा" ॥)
अस्या गुणाः । हिमत्वम् । शुक्रवृद्धिकारित्वम् ।
चक्षुर्हितत्वम् । वातकोपनत्वम् । मूत्रकृच्छ्राश्मरी-
दाहपित्तशोणितनाशित्वञ्च । इति राजनिर्घण्टः ॥
(यथा वैद्यके,
"एरका शिशिरा वृष्या चक्षुष्या वातकोपिनी ।
मूत्रकृच्छ्राश्मरीदाहपित्तशोणितनाशिनी" ॥
एषा यत्र व्यवह्रियते तद्यथा,—
"निर्व्वापणः स्याज्जलमेरका च" ।
इति चरके सूत्रस्थाने तृतीयेऽध्याये ॥ "एरका
होगलः" । इति चरकस्य शिवदासीयटीका ॥)
एरङ्गः, पुं, (एरति सम्यक् भमति यः । आ + ईर
गतौ कम्पने + अङ्गच् ।) मत्स्यभेदः । एङ्गा इति
ख्यातिः । अस्य गुणाः । मधुरत्वम् । स्निग्धत्वम् ।
विष्टम्भित्वम् । शीतलत्वम् । गुरुत्वञ्च । इति भाव-
प्रकाशः ॥
एरण्डः पुं, (एरयति वायुम् । आ + ईर गतौ कम्पने
च + बाहुलकात् अण्डच् ।) वृक्षविशेषः । भेरेण्डा
इति भाषा । तत्पर्य्यायः । व्याघ्रपुच्छः २ गन्धर्व्व-
हस्तकः ३ उरुवूकः ४ रुवूकः ५ चित्रकः ६ चञ्चुः
७ पञ्चाङ्गुलः ८ मण्डः ९ वर्द्धमानः १० व्यडम्बकः
११ । इत्यमरः ॥ उरुवुकः १२ रुवुकः १३ रुवुकः
१४ रुवकः १५ वुकः १६ आमण्डः १७ आमण्डः
१८ व्यड़म्बनः १९ । इति तट्टीकायां भरतः ॥
कान्तः २० तरुणः २१ शुक्लः २२ वातारिः २३
दीर्घपत्रकः २४ । इति राजनिर्घण्टः ॥ अस्य
तैलस्य गुणाः । मधुरत्वम् । गुरुत्वम् । अतिश्लेष्म-
वर्द्धनत्वम् । वातरक्तगुल्महृद्रोगजीर्णज्वरनाशि-
त्वञ्च । इति राजवल्लभः ॥ अपि च । कृमिदोष-
सकलाङ्गशूलकुष्ठनाशित्वम् । स्वादुत्वम् । रसाय-
नोत्तमत्वम् । पित्तप्रकोपनत्वम् । अतिदीपनत्वम् ।
आमवातनाशित्वञ्च । इति राजनिर्घण्टः ॥ अस्य
भेदकत्वगुणोऽप्यस्ति ॥ श्वेतैरण्डगुणाः । कटुत्वम् ।
तिक्तत्वम् । उष्णत्वम् । कफार्त्तिज्वरवायुकासना-
शित्वम् । रसाढ्यत्वञ्च । इति राजनिर्घण्टः ॥ अस्य
मूलगुणाः । शूलवायुकफनाशित्वम् । शुक्रकारित्वञ्च ।
इति राजवल्लभः ॥
(शुक्लरक्तैरण्डयोः पर्य्यायगुणा यथा,—
"शुक्ल एरण्ड आमण्डश्चित्रो गन्धर्व्वहस्तकः ।
पञ्चाङ्गुलो वर्द्धमानो दीर्घदण्डोऽप्यदण्डकः ।
वातारिस्तरुणश्चापि रुवूकश्च निगद्यते ॥
रक्तोऽपरो रुवकः स्यादुरुवूको रुवूस्तथा ।
व्याघ्रपुच्छश्च वातारिश्चञ्चुरुत्तानपत्रकः ॥
एरण्डयुग्मं मधुरमुष्णं गुरु विनाशयेत् ।
शूलशोथकटीवस्तिशिरःपीड़ोदरज्वरान् ॥
ब्रध्नश्वासकफानाहकासकुष्ठाममारुतान् ।
एरण्डपत्रं वातघ्नं कफक्रिमिविनाशनम् ॥
मूत्रकृच्छ्रहरञ्चापि पित्तरक्तप्रकोपनम् ।
वाताग्रदलं गुल्मं वस्तिशूलहरं परम् ॥
कफवातक्रिमीन् हन्ति वृद्धिं सप्तविधामपि ।
एरण्डफलमत्युष्णं गुल्मशूलानिलापहम् ॥
यकृत्प्लीहोदराशोघ्नं कटुकं दीपनं परम् ।
तद्वन्मज्जा च विड़्भेदी वातश्लेष्मोदरापहः" ॥
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥
"सतिक्तोषणमेरण्डतैलं स्वादु सरं गुरु ।
ब्रध्नगुल्मानिलकफानुदरं विषमज्वरम् ॥
रुक्शोफौ च कटीगुह्यकुष्ठपृष्ठाश्रयाञ्जयेत् ।
तीक्ष्णोष्णं पिच्छिलं विस्रं रक्तैरण्डोद्भवन्त्विति" ॥
इति शार्ङ्गधरस्य पूर्ब्बखण्डे चतुर्थेऽध्याये ॥
"एरण्डतैलं मधुरमुष्णं तीक्ष्णं दीपनं कटुकषा-
यानुरसं सूक्ष्मं स्रोतोविशोधनं त्वच्यं वृष्यं मधुर-
विपाकं वयःस्थापनं योनिशुक्रविशोधनमारो-
ग्यमेधाकान्तिस्मृतिबलकरं वातकफहरमधोभाग-
दोषहरञ्च" ॥
इति सुश्रुते सूत्रस्थाने पञ्चचत्वारिंशत्तमेऽध्याये ॥)
एरण्डकः, पुं, (एरण्ड + स्वार्थे कन् ।) एरण्डवृक्षः ।
इति भरतो द्विरूपकोषश्च ॥ (एरण्डशब्देऽस्य
विशेषो ज्ञेयः ॥)
एरण्डजं, त्रि, (एरण्डात् एरण्डवृक्षात् जायते इति ।
एरण्ड + जन् + ड ।) एरण्डवृक्षजातम् । तत्तैलं
स्नेहमध्ये श्रेष्ठविरेचकम् । यथा ।
"चूर्णमध्ये त्रिवृत्चूर्णं स्नेहरसे कारवेल्लकम् ।
स्नेहेष्वेरण्डजं तैलं फलेष्वेव हरीतकी" ॥
इति वाभटः ॥
("एरण्डजं घनञ्चापि स्वादुमेव मृदु सरम् ।
वृद्धिविन्द्राहाकद्यूरुशूलानाहविबन्धनुत् ॥
आनाहाष्ठीलवातासृक्प्लीहोदावर्त्तशूलिनाम् ।
वातपित्तविकाराणां विदध्याच्च प्रशान्तये ।
तीक्ष्णोष्णं पिच्छिलं विस्रं रक्तैरण्डसमुद्भवम्" ॥
इति प्रथमस्थाने अष्टमेऽध्याये हारीतेनोक्तम् ॥)
एरण्डपत्रिका, स्त्री, (एरण्डस्य पत्रमिव पत्रमस्याः ।)
दन्तीवृक्षः । इति राजनिर्घण्टः ॥
एरण्डफला, स्त्री, (एरण्डस्य फलमिव फलमस्याः ।)